प्रार्थनाधशकस्तोत्रम्

रमारमणमध्वादिदेशिक श्रीहृदब्जग ।
हयग्रीव कृपालो मे प्रार्थनां श्रुणु सादरम् ॥ १ ॥

अयोग्यविषये स्वामिन् सर्वथा न मनो भवेत् ।
चांचल्यं मूलतश्छिंधि दुराशां हर दूरतः ॥ २ ॥

दुर्बुद्धिं च न मे देहि दुःशास्त्रावर्तने रतिम् ।
हापयस्व च दुर्मानं दुर्गुणं मोचय प्रभो ॥ ३ ॥

दुःसंगं दुष्क्रियां छिंधि हर लोकाटनात्पदौ ।
न नियोजय चक्षूंषि परदारादिदर्शने ॥ ४ ॥

दुष्प्रतिग्रहदुस्पर्शे करौ मा चोदय ध्रुवम् ।
अगम्यागमने गुह्यां घ्राणमाघ्राणनेऽसताम् ॥ ५ ॥

अपकर्षतु जिह्वां मे लोकवार्तादुरन्नतः ।
दुर्वार्तादुष्टशब्देभ्यो निवर्तय हरे श्रुती ॥ ६ ॥

भवदिच्छानुगं चेतो योग्यसद्विषयं भवेत् ।
यदृच्छालाभसंतृप्तं निश्चांचल्यं भवेत्वयि ॥ ७ ॥

सज्ञानं सर्वदा देहि सच्छास्त्रावर्तने रतिम् ।
सत्संगं सत्क्रियां चैव पादौ त्वत्क्षेत्रसर्पणे ॥ ८ ॥

श्रीमध्वशास्त्रश्रवणे नियंक्ष्व श्रवणे सदा ।
हयास्य चक्षुषी चेमे दर्शने सन्नियोजय ॥ ९ ॥

करौ त्वदर्चने नित्यं सुखतीर्थस्य लेखने ।
त्वदालापे त्वदुच्छिष्टभोजने कुरु जिह्विकाम् ॥ १० ॥

घ्राणं भवतु निर्माल्याघ्राणने नमने शिरः ।
देहि मे तु ज्ञानभक्तिपशुपुत्रधनादिकम् ॥ ११ ॥

प्रार्थनादशनं चैतत् त्रिकाले यः पठेन्नरः ।
तस्याभीष्टं हयास्योऽसौ दत्वा रक्षति सर्वदा ॥ १२ ॥

॥ इति श्रीमद्वादिराजपूज्यचरणविरचितं प्रार्थनादशकस्तोत्रं समाप्तम् ॥

www.yousigma.com